# ५. पुरुषसूक्तम्

॥ तैत्तिरीयारण्यकम् तृतीयः प्रश्नः ॥

ॐ तच्छंयोरावृणीमहे । गातुं यज्ञाय ।
गातुं यज्ञपतये । दैवीः स्वस्तिरस्तु नः ।
स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् ।
शं नो अस्तु द्विपदे । शं चतुष्पदे ।
ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्‌दशाङ्गुलम् ।
पुरुष एवेदग्ं सर्वम् । यद्‌भूतं यच्च भव्यम् ।
उतामृतत्त्वस्येशानः । यदन्नेनातिरोहति ।
एतावानस्य महिमा । अतो ज्यायाग्ंश्च पूरुषः ॥ १ ॥

पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि ।
त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाऽऽभवात्पुनः ।
ततो विष्वङ्व्यक्रामत् । साशनानशने अभि ।
तस्माद्विराडजायत । विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत । पश्चाद्‌भूमिमथो पुरः ॥ २ ॥

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मश्शरद्धविः ।
सप्तास्यासन्परिधयः । त्रिः सप्तः समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् ॥ ३ ॥

Sanskritchantsnprayers By Pratibha Jani

तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।
तेन देवा अयजन्त । साध्या ऋषयश्च ये ।
तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् ।
पशूँग्स्ताँग्श्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये ।
तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।
छन्दाग्ंसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ ४ ॥

तस्मादश्वा अजायन्त । ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ।
यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहु । कावूरू पादावुच्येते ।
ब्राह्मणोऽस्य मुखमासीत् । बाहु राजन्यः कृतः ॥ ५ ॥

ऊरु तदस्य यद्वैश्यः । पद्भ्यां शूद्रो अजायत ।
चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत ।
नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाग्ं अकल्पयन् ॥ ६ ॥

वेदाहमेतं पुरुषं महान्तं । आदित्यवर्णं तमसस्तुपारे ।
सर्वाणि रूपाणि विचित्य धीरः
नामानि कृत्वाऽभिवदन् यदास्ते ।
धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः ।
तमेवं विद्वानमृत इह भवति ।

Sanskritchantsnprayers By Pratibha Jani

नान्यः पन्था अयनाय विद्यते ।
यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते ।
यत्र पूर्वे साध्याः सन्ति देवाः ॥ ७ ॥
अद्भ्यः संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्तताधि ।
तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे ।
वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् ।
तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय ।
प्रजापतिश्चरति गर्भे अन्तः ।
अजायमानो बहुधा विजायते ॥ ८ ॥

तस्य धीराः परिजानन्ति योनिम् ।
मरीचीनां पदमिच्छन्ति वेधसः ।
यो देवेभ्य आतपति । यो देवानां पुरोहितः ।
पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये ।
रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन् वशे ॥ ९ ॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे ।
नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् ।
इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ॥ १० ॥

॥ हरिः ॐ ॥

Sanskritchantsnprayers By Pratibha Jain